MANĪṢĀ - *A Research Journal of Sanskrit* ISSN : 2583-2271
Vol. - I, No. 1: 2021

# अभिज्ञानशकुन्तले कालिदासस्य प्रकृतिभावना

**सुस्मिता दे**

*प्रकृतिः परिवेशश्च मानवजीवनस्य अपरिहार्यम् अविच्छेद्यम् अङ्गम्। विविधकविमानसे प्रकृतिभावना विविधरूपेण संलक्षते। आदिकवेः वाल्मीकेः विरचिते रामायणमहाकाव्ये प्रकृतिभावना परिदृश्यते। महाभारतेऽपि प्रकृतिभावना संलक्षते।*

*निसर्गवर्णनानिपुणः कविः कालिदासः काव्यनाटकेषु एवं स्ववैशिष्ट्यं प्रदर्शयति यत्र प्रकृत्या सह मानवमानसस्य प्रगाढं नैकट्यं स्थाप्यते। कालिदासस्य कवित्वे प्रकृतौ मानवे च कोऽपि भेदो नासीत्। महाकवेः प्रकृतिप्रणयः खण्डकाव्ये ऋतुसंहारे मेघदूते च वर्णिता। कुमारसम्भवकाव्ये हिमालयवर्णनं वसन्त-वर्णनं च महता नैपुण्येन कृतम्।*

*यथा काव्ये तथा नाटकेऽपि प्रकटितं कविचातुर्यं प्राकृतिकवर्णनायाम्। कवेः सर्वाधिकं वैशिष्ट्यं विलोकितं नाटकश्रेष्ठे अभिज्ञानशकुन्तले। अस्मिन् नाटके प्रकृतिः यादृशीं प्रधानतां गमितासीत् न तादृशं कस्मिंश्चिदन्यस्मिन् काव्ये नीता परिलक्षन्ते। नाटकस्य प्रथमाङ्के कृष्णसारमृगस्य शरपतनभयात् पलायनमानस्य द्रुतमुल्लम्फनं परमशोभाजनकम्,-*

*"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः*
*पश्चार्धेन प्रविष्टः शरपतनभयात् भूयसा पूर्वकायम्।*
*दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्माः*
*पश्योदग्रप्लुतत्वाद् वियति वहुतरं स्तोकमुर्व्यां प्रयाति॥"*

*कण्वाश्रमे वृक्षतले पतितं नीवारधान्यं मृगाणां निःशङ्कविचरणं नवपल्लवानि धूमाराशयश्च आश्रमशोभां विवर्धयन्ति। द्वितीय-तृतीयाङ्केऽपि प्राकतिकशोभां द्विगुणीकुर्वन्ति। चतुर्थाङ्कस्तु यथायथः प्रकृते लीलाभूमिः। तपोवनस्य सर्वैः चेतनाचेतनपदार्थैः सह शकुन्तलायाः ईदृशम् अन्तरङ्गम् आत्मीयत्वं ईदृशं च कल्याणवन्धनम् आसीत् यत् तस्याः पतिगृहयात्राकाले वनदेवता पितृकुटुम्बिन इव तस्यै मण्डनार्थं वसनाभरणानि उपढोकन्ते स्म। शकुन्तलायाः पतिगृहगमनावसरे आश्रमपादपा अमूल्याभरणप्रेषनेन शुभ्रपट्टवस्त्रप्रकाशनेन अलक्तकोद्गिरणेन सम्प्रीतिं सूचयन्ति।*

*पञ्चमाङ्के नागरिक परिवेशाधिक्येऽपि प्राकृतिकी शोभा स्वल्पशो विराजिता। षष्ठाङ्के प्रमोदवने वसन्तशोभा माधवीलतामण्डपं वा कस्य न मनो हरति। सप्तमाङ्के मारीचाश्रमे मन्दारादि-तरूणां समावेशः पद्मवनानि च पुनः पूर्णशोभासाधनाय अलम्।एवं सर्वेषु अङ्केषु प्राकृतिक-चित्रवाहुल्यम् इदमेव प्रतिभाति निसर्गराज्ये विलसति कालिदासः कविरिति।*

प्रकृतिः तत्परिवेशश्च मानवजीवनस्य एकः अपरिहार्यः अविच्छेद्यश्च अंशो भवति। अस्माकं चतुर्षु पार्श्वेषु स्थितैः वृक्ष-नदी-पक्षी-पर्वत-वनप्रभृतिभिः सजीवनिर्जीवोपादानैः निर्मितोऽयं प्राकृतिकपरिवेशः। विविधकवि-मानसे प्रकृतिभावना विविधरूपेण संलक्ष्यते। आदिकवेः वाल्मीकेः विरचिते रामायण-महाकाव्ये प्रकृतिभावना यथा,-

"सप्राज्यफलमूलानि पुष्पितानि वनानि च।
प्रशस्तमृगयूथानि शान्तपक्षिमृगानि च॥
फुल्लपङ्कजषण्डानि प्रसन्नसलिलानि च।
कारण्डवविकीर्णानि तटाकानि सरांसि च॥
द्रक्ष्यसे दृष्टिरम्यानि गिरिप्रसवणानि च।

ISSN : 2583-2271
Vol. - I, No. 1: 2021

रमनीयान्यरण्यानि मयूराभिरुतानि च॥”[1]

महाभारतेऽपि प्रकृतिभावना परिलक्ष्यते,-

“महान् वृक्षो जायते वर्धते च
तं चैव भूतानि समाशयन्ति।
यदा वृक्षश्छिद्यते दह्यते च
तदाश्रया अनिकेता भवन्ति॥”[2]

निसर्गवर्णनानिपुणः कविः कालिदासः काव्यनाटकेषु एवं स्ववैशिष्ट्यं प्रदर्शयति यत्र प्रकृत्या सह मानवमानसस्य प्रगाढं नैकट्यं दरीदृश्यते। जगति यत् सौन्दर्यं बहिःप्रकृतिं रञ्जयति आभ्यन्तर्यामपि प्रकृत्यां तदेव विलसति। इत्थं सौन्दर्यदृष्ट्या कालिदासस्य कवित्वे प्रकृतौ मानवे च कोऽपि भेदो नास्ति। अपि तु तत्रासीत् पूर्णमद्वैतम्। महाकविः द्वयमेव समपक्षपातया भक्त्या असेवत। जडा प्रकृतिरपि भावविह्वला प्राणवती सती कालिदासस्यैव सृजनीशक्तिम् उद्घोषयति।

महाकवेः प्रकृतिप्रणयः खण्डकाव्ये ऋतुसंहारेऽपि वर्णितः। सा वर्णना एवं मनोरमा यत् पाठमात्रमेव ऋतुनामाविर्भावः अनुभूयते। कालिदासस्य ऋतुसंहारे प्रकृतिः न केवलमुद्दीपनरूपेण चित्रिता अभवत्, परन्तु सा तत्रालम्बनरूपेणापि वर्णिता आसीत्।

अपरखण्डकाव्ये मेघदूते यक्षस्य विरहिण्याः पत्न्याः सकाशे वार्तावहनाय मेघस्तु दौतकर्मणि नियुक्तः। अस्मिन् काव्ये धूमज्योतिःसलिलमरुतां सन्निपातः मेघः एव विरहिणो यक्षस्य सहृदयसखा इव सन्देशवाहकः। तत्रत्या प्राणचञ्चला प्राकृतिकी वर्णना पाठकानाम् अतीव मनोहारिणी सञ्जाता।

कुमारसम्भवकाव्ये हिमालयवर्णनं वसन्तवर्णनं च महता नैपुण्येन कृतम्। तत्र तरुलतापशुपक्षिणश्च नवनवरूपमण्डिताः कीदृशा लोचनलोभनीयाः श्रवणसुखकराश्च भवन्तीति तद्रवैः पाठका एव तद्विजानन्ति। कविस्तस्य रघुवंशनामके श्रेष्ठकाव्ये यादृशं प्राकृतिकवैचित्र्यं प्रकटयति नास्ति तस्य तुलना। तत्र नक्षत्रशोभितगगनं फेनिल-नील समुद्रः चिरहरिद्वनस्थली वा कस्य न चित्तम् आन्दोलयति। मानवमनसा समभावप्रवणां प्रकृतिम् अङ्कयति अत्र कविः। अतः सीतादुःखेन व्यथिता भागीरथी लक्षणं सीतानिर्वासनाद् निवारयति तरङ्गभङ्गेन। तरु-लता-मृग-मयूराः सर्वे क्रन्दन्ति सीतासन्तापात्। उक्तञ्च,-

“नृत्यं मयूराः कुसुमानि वृक्षा
दर्भानुपातान् विजहुर्हरिणाः।
तस्याः प्रपन्ने समदुःखभावम-
त्यन्तमासीद् रुदितं वनेऽपि॥”[3]

यथा काव्ये तथा नाटकेऽपि प्रकटितं कविचातुर्यं प्राकृतिकवर्णनायां मालविकाग्निमित्रे महाकविना कमनीयकलेवरा मालविका प्रकृतिदेव्याः प्रतिमूर्तित्वेन कल्पयित्वा सन्निवेशिता। विक्रमोर्वशीयनाटके राजा उर्वशीसन्धानाय सकरुणं विलपति प्रति तरु, प्रति गुल्मं, प्रति जीवं च, येन कारुण्येन अमानुषो जीवोऽपि संवेदनशीलो भवति।

कवेः सर्वाधिकं वैशिष्ट्यं विलोकितं नाटकश्रेष्ठे अभिज्ञानशकुन्तले। इदमेव नाटकं प्रकृतिराज्यम्। काव्यमिदं प्रकृतेरनुपमा रङ्गशाला इव भाति। यथा प्रेक्षागृहे उपविष्टः सहृदयः प्रेक्षकः रङ्गमध्ये विविधानि विचित्राणि दृश्यानि पश्यति, तथा अत्रापि सहृदयः पाठकः स्वसमक्षे चित्ताकर्षकाणि प्रकृतेः बहूनि रूपाणि नवनवानि प्रेक्षते, यानि कवेः प्रकृतिं प्रति निगूढम् आकर्षणं तच्चित्रणकौशलं च प्रकटयन्ति। यद्यपि प्रकृतिवर्णना महाकवेः सर्वासु रचनासु

---

[1] रामायणम्, अरण्यकाण्डम्, ८ अध्यायः, १२-१५

[2] महाभारतम्, शान्तिपर्वम्, ९१.२६

[3] रघुवंशम्, १४ सर्गः, ६९

ISSN : 2583-2271
Vol. - I, No. 1: 2021

न्यूनाधिकं संलक्ष्यते, तथापि तद्वर्णनायां महाकवेः इतरकविविलक्षणा या प्रतिभा सा तु तस्य अभिज्ञान-शकुन्तलम् नाटके वाहुल्येन लभ्यते।

अस्मिन् नाटके प्रकृतिः यादृशीं प्रधानतां गमितासीत् न तादृशं कस्मिंश्चिदन्यस्मिन् काव्ये परिलक्ष्यते। चेतनाचेतनादीनि प्रकृत्यङ्गभूतानि सर्वाणि अत्र महाकवेः लेखनीस्पर्शेन न केवलं मानवप्रकृत्या तादात्म्यं लभते, परं तु पशुपक्षिवृक्षलतादिकम् आत्मभावं रक्षित्वापि मानवैः सह आत्मीयतां भजते, मानववत् आचरति च । अत्र जडप्रकृतिरपि ईदृशी संवेदनशीला प्रदर्शितास्ति यत् सा तेषां सम्पत्तौ हर्षोत्फुल्ला विपत्तौ च तेषां विमर्षा भवन्ति। नाटकेऽस्मिन् वस्तुतः अन्यपात्राणामिव प्रकृतेरपि प्रमुखा भूमिकास्ति या कथमपि न उपेक्षणीया।

अभिज्ञान-शकुन्तलस्य सर्वेषु अङ्केषु प्राकृतिकः परिवेशः प्रकटितः। प्रथमाङ्के कृष्णसारमृगस्य शरपतनभयात् पलायनमानस्य द्रुतमुल्लम्फनं परमशोभाजनकम्,-

“ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयात् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्माः
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥”[4]

कण्वाश्रमे वृक्षतले पतितं नीवारधान्यं मृगाणां निःशङ्कविचरणं नवपल्लवानि धूमाराशयश्च आश्रमशोभां विवर्धयन्ति -

“नीवाराः शुकगर्भकोटरमुखभ्रष्टा-स्तरूणामधः प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवपलाः।
विश्वासोपगमादभिन्नगतयः शव्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिस्यन्द-रेखाङ्किताः॥”[5]

द्वितीयाङ्के घनसन्निविष्टं लतागृहं नयनलोभनीयं सञ्जातम्। राजा दुष्यन्तः निभृते शिलातलमुपविश्य वयस्यमाधवस्य पुरतः शकुन्तलाविषयिणीं कथाम् उपस्थापयन् विविधरूपेण शकुन्तलायाः अलोकसामान्यं सौन्दर्यवर्णनमकरोत् -

“अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रुपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति॥”[6]

अत्र रूपवर्णनेन सह प्रकृतिप्रीतिबन्धनमासीत्।

तृतीयाङ्के मालिनीतीरे वेतसवने लतामण्डपं मृदुसमीरणः सुमिष्टः पद्मगन्धः प्राकृतिकशोभां द्विगुणीकरोति। चतुर्थाङ्कस्तु यथायथः प्रकृतेः लीलाभूमिः। समग्रा प्रकृतिः शकुन्तलायाम् अनुरागवती। तपोवनस्य सर्वैः चेतनाचेतनपदार्थैः सह शकुन्तलायाः ईदृशम् अन्तरङ्गम् आत्मीयत्वम् ईदृशं च कल्याणबन्धनम् आसीत् यत्, तस्याः पतिगृहयात्राकाले वनदेवता पितृकुटुम्बिन इव तस्यै मण्डनार्थं वसनाभरणानि उपढौकन्ते स्म। शकुन्तलायाः पतिगृहगमनावसरे आश्रमपादपा अमूल्याभरणप्रेषणेन शुभ्रपट्टवस्त्रप्रकाशनेन अलक्तकोद्गिरणेन सम्प्रीतिं सूचयन्ति,-

“क्षौमं केनचिदिन्दुपाण्डुतरुणा माङ्गल्यमाविष्कृतं

[4] अभिज्ञान-शकुन्तलम्, १.७

[5] अभिज्ञान-शकुन्तलम्, १.१४

[6] अभिज्ञान-शकुन्तलम्, २.१०

निष्ठ्युतश्चरणोपरागसुभगो लाक्षारसः
केनचित्।
अन्य◌ेभ्य◌ो
वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्य◌ाभरणानि नः
किशलयोद्भेदप्रतिद्वन्द्विभिः॥"[7]

काश्यपः तस्य◌ाः तपोवनत्य◌ागे स्वजनान् इव तपोवनप्रकृतिभूतान् वृक्षलतादीन् अनुज्ञां य◌ाचते। भो भो सन्निहितास्तपोवनतरवः,-

"पातुं न प्रथमं व्यवस्यति जलं
युष्मास्वपीतेषु य◌ा,
नादत्ते प्रियमण्डनापि भवतां स्नेहेन य◌ा पल्लवम्।
आद्य◌े वः कुसुमप्रसूतिसमये यस्य◌ाः भवत्युत्सवः
सेयं य◌ाति शकुन्तला पतिगृहं
सर्वैरनुज्ञायताम्॥"[8]

कोकिलाः मधुररुतेन अनुज्ञां ज्ञापयन्ति स्म। आसन्नवियोगं विचिन्त्य न केवलं तपोवनविरहकातरा शकुन्तला, परं तया उपस्थितवियोगस्य तपोवनस्य◌ापि समदशा अजायत। तथाचोक्तं,-

"उद्गलितदर्भकवला मृगाः परित्यक्तनर्तना
मयुराः।
अपसृतपाण्ड◌ुपत्रा मुञ्चन्त्यश्रूण◌ीव
लता◌ः॥"[9]

सखीद्वयेन सह कण्वो यथा विलपति प्रकृतिश्च तथैव शोचति। मृगशिशुरासन्नमातृवियोगभिया शकुन्तलायाः वस्त्राञ्चलमाकृष्य गमनान्निवारयति। सर्वे एव वियोगकातराः स्वजना इव आचरन्ति। कविवर्णितं सर्वं कारुण्य◌ं साक्षादिवानुभवन्तः सहृदयसामाजिकाः स्वसत्तां विस्मृताः तपोवनसत्त्वैः सह तादात्म्य◌ं भजन्ते। पञ्चमाङ्के नागरिक परिवेशात् अधिकोऽपि प्राकृतिकी शोभा स्वल्पशो विराजिता। षष्ठाङ्के प्रमोदवने वसन्तशोभा माधवीलतामण्डपं वा कस्य न मनो हरति। राज्ञः विरहदशायां प्रकृतिरपि समव्यथिता,-

"चुतानां चिरनिर्गतापि कलिका वध्नाति न स्वं
रजः
सन्नद्धं यदपि स्थितं कुरवकं तत्
कोरकावस्थय◌ा।
कण्ठेषु स्खलितं गतेऽपि शिशिरे
पुंस्कोकिलानां रुतम्
शङ्के संहरति स्मरोऽपि चकितस्तूणार्धकृष्टं
शरम्॥"[10]

सप्तमाङ्के मारीचाश्रमे मन्दारादि-तरूणां समावेशः पद्मवनानि च पुनः पूर्णशोभासाधनाय अलम् एवं सर्वेषु अङ्केषु प्राकृतिकचित्रबाहूल्य◌ेन इदमेव प्रतिभाति निसर्गराज्य◌े विलसति कालिदासः कविरिति।

अस्मिन् नाटके वर्णिता प्रकृतिः न कदापि बहिरतिष्ठत् परं तु शकुन्तलाचरित्रे एव तस्य◌ाः उन्मेषः साफल्य◌ेन कृतः। अतः तपोवनपरिवेष्टनात् तस्य◌ाः बहिरानयनम् असम्भवम्। तपोवनं परितज्य गन्तुमुद्यतायाः तस्य◌ाः आकर्षणं प्रतिपदं वेदना च पदे पदे। प्रकृतेः मानवस्य च विच्छेदः एतादृशः मर्मन्तुदः सकरुणश्च भवितुमर्हति इति जगति साहित्य◌ेषु सर्वेषु अभिज्ञान-शकुन्तले एव केवलं लभ्यते। अस्मिन् काव्य◌े यथा धर्मनियमेन सह स्वभावस्य समन्वयो दृश्यते, तथा प्रकृत्य◌ा सह मानवस्य परस्परसाहचर्यमपि लतायाः पुष्पेण सह य◌ः सम्बन्धः तथा तपोवनपरिवेशेन सह शकुन्तलायाः स्वाभाविकः सम्बन्धः। अस्मिन् विषये रवीन्द्रनाथस्य मन्तव्यमुद्धृत्य उपसंहारः क्रियते-

"अभिज्ञानशकुन्तलनाटके अनसूया प्रियंवदा येमन, कण्व य◌ेमन, दुष्यन्त

---

[7] अभिज्ञान-शकुन्तलम्, ४.५
[8] अभिज्ञान-शकुन्तलम्, ४.९
[9] अभिज्ञान-शकुन्तलम्, ४.१२
[10] अभिज्ञान-शकुन्तलम्, ६.४

येमन, तपोवन प्रकृतिओ तेमनि एकजन विशेष पात्र। एइ मूक प्रकृतिके कोन नाटकेर भितर एमन प्रधान, एमन अत्यावश्यक स्थान देओया याइते पारे, ताहा वोधकरि, संस्कृतसाहित्य छाड़ा आर कोथाओ देखा याय नाइ। प्रकृतिके मानुष करिया तुलिया ताहार मुखे कथावार्ता वसाइया रूपकनाट्य रचित हइते पारे, किन्तु प्रकृतिके प्रकृत राखिया एमन अन्तरङ्ग करिया तोला, ताहार द्वारा नाटकेर एत कार्य साधन कराइया लओया एतो अन्यत्र देखि नाइ।"[11]

**सहायकग्रन्थाः**


- वाल्मीकि-रामायणम् (द्वितीयखण्ड)। सम्पा. ड. रविप्रकाश आर्य। दिल्ली- परिमल पावलिकेशन, २००४
- महाभारतम्(पञ्चम षष्ठखण्डम् च)। सम्पा. पण्डित रामनारायणदत्त शास्त्री पाण्डेय। गोरखपुर- गीताप्रेस, १९६५
- कालिदास। अभिज्ञानशकुन्तलम्। सम्पा. सत्यनारायण चक्रवर्ती। कलिकाता- संस्कृत पुस्तकभाण्डार, १९८८
- कालिदास। अभिज्ञानशकुन्तलम्। सम्पा. एम.आर.काले। दिल्ली- मोतिलाल वाणारसी दास, १८९८
  कालिदास। अभिज्ञानशकुन्तलम्। सम्पा. ड. अनिलचन्द्र वसु। कलिकाता- संस्कृत वुक ड़िपो, २००३


[11] प्राचीनसाहित्य, रवीन्द्रनाथ